# Shri Nigraheshvari Sahasranama Stotram

# श्रीनिग्रहेश्वरीसहस्रनामस्तोत्रम्

## Document Information

Text title : Nigraheshvari Sahasranamastotram Composed by Shri Bhagavatananda Guru

File name : nigraheshvarIsahasranAmastotram.itx

Category : devii, sahasranAma, bhAgavatAnanda

Location : doc_devii

Author : (Copyright) Shri Bhagavatananda Guru

Description/comments : See the corresponding nAmAvalI

Acknowledge-Permission: By author Shri Bhagavatananda Guru

Latest update : September 5, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 5, 2024

*sanskritdocuments.org*

# श्रीनिग्रहेश्वरीसहस्त्रनामस्तोत्रम्

॥ ध्यानम् ॥

श्रीमित्रेश्वरपूजिताब्जचरणां श्रीसिद्धनाथार्चितां
शाक्तान्तर्गतनिग्रहागमनुतां पाखण्डविध्वंसिनीम् ।
सप्तास्याङ्कितनिग्रहेश्वरहृदि प्राकाम्यसञ्चारिणीं
सिद्धाज्ञाकुलबोधिनीं भगवतीं श्रीनिग्रहेशीं भजे ॥ १॥

॥ अथ सहस्त्रनामानि ॥

ॐ ह्रीं अकाराकारसम्भूताकारवाच्याकनिष्ठिका ।
अकल्काकल्पिताकथ्याकालपूज्याकुतोभया ॥ २॥

अगम्याकालजलदोदयाकर्मान्विताकृता ।
अकारणगुणोत्पन्नगुणाकार्पण्यविग्रहा ॥ ३॥

अकिल्विषाकुप्यवस्त्राकूपाराकूर्चमानसा ।
अक्षाक्रान्ताक्षमालाक्षसूत्ररूपाक्षपाटका ॥ ४॥

अक्षुण्णाक्ष्णनियन्त्री चागदङ्कारप्रपूजिता ।
अगप्रभानलद्योतात्रेयज्योत्स्नाग्निसम्भवा ॥ ५॥

अग्निमुख्यग्निजिह्वाग्निवल्लभा चाघमर्षणा ।
अनङ्गाङ्कोलिकानङ्गानङ्गकालाङ्कपालिका ॥ ६॥

अजपाजाग्रिमाघोराकौटिल्याजाङ्कुराङ्गतिः ।
अग्रियाच्छिन्नसत्ता चाजराच्छिद्रावधारणा ॥ ७॥

अजुगुप्सितवृत्तान्तातुल्या चातीवकोपना ।
अमरानीकसम्मान्यार्तवहीनाञ्जनावती ॥ ८॥

अथर्वणाप्रतिद्वन्द्वचरित्रापेतराक्षसी ।
अन्तर्भूतान्नपूर्णाद्रीन्द्रात्मजानूकरक्षिणी ॥ ९॥

अद्वितीयाद्वैतनिष्ठाद्रिकीलाद्रिपतिप्रिया ।
अत्रिदृग्जप्रियाधृष्याब्भ्रमातङ्गेशवल्लभा ॥ १०॥

अब्धिजाब्धिजनेत्राब्दसारसुन्दर्यबन्धना ।
अभ्यवस्कन्दनरताभिसम्पातविशारदा ॥ ११॥

अमित्रघ्न्यम्बुवाची चापर्णामृततरङ्गिणी ।
अमर्त्यभुवनाधीशामावस्याभ्भक्षमालिनी ॥ १२॥

अव्याहृतावाप्यवृत्तिरव्याहतपराक्रमा ।
अव्यक्तावोदहृदयाविस्पष्टस्थितिसंस्थिता ॥ १३॥

अविमुक्तनिवासाजाश्वाविखङ्गबलिप्रिया ।
असाधारणयाष्टीकाश्वमेधादिभिरर्चिता ॥ १४॥

अश्ववक्राष्टकर्णासूर्यम्पश्या चाष्टमातृका ।
असृक्पासृक्प्रियाहल्याकाशगङ्गागमस्तुता ॥ १५॥

आखण्डलप्रियाकाङ्क्षाग्नेयी चाङ्गारलोचना ।
आचार्याचारसंसिद्धाचाराचारविवर्जिता ॥ १६॥

आजकारस्थिताजानेयारूढातङ्कनाशिनी ।
आत्मगुप्तापन्नसत्त्वान्वीक्षिकी चामिषप्रिया ॥ १७॥

आयुष्यसूक्तसम्पूज्यायुष्करी चाम्बिकादितिः ।
आर्यिकालेख्यशेषारिस्वर्गदायुधधर्मिणी ॥ १८॥

आशीविषेन्द्रजननी चाशुशुक्षणिरूपिणी ।
आहवज्ञानकुशलास्तीकमातास्यलाङ्गला ॥ १९॥

इक्षुहस्तेन्दिरेक्ष्वाकुपूजितेन्दुधरप्रिया ।
इन्द्रराज्यप्रदेन्द्रादिस्तुतेन्द्रारिविनाशिनी ॥ २०॥

इन्द्रजालकरीन्द्राणीन्द्रनीलमणिसन्निभा ।
इन्द्रप्रस्थेशवरदा चेन्द्रप्रहरणायुधा ॥ २१॥

इन्द्रानुजप्रियेन्द्राज्यज्ञानदेन्द्राघनाशिनी ।
इष्टेष्टापूर्त्तफलदेष्टार्थोद्युक्तेष्मधर्मिणी ॥ २२॥

उग्रतारोग्रचण्डोग्रशेखरोग्रोग्रवाहना ।
उच्छिष्टभोजनोड्डामरेश्वरोक्तमनुस्तुता ॥ २३॥

उड्डीशमन्त्रविज्ञानोत्कटोत्तंसविभूषणा ।
उत्तराशेशवरदोत्तरकोशलरक्षिणी ॥ २४॥

उद्बुद्धनयनोद्दीप्तोद्दन्तुरोद्घाटितस्मृतिः ।
उद्गीथपूजितोदारोषोर्वशी चोरगस्थिता ॥ २५॥

ऋक्षराजसुतर्णापनोदनर्तुमती तथा ।
एकदन्तप्रिया चैकदन्तमातैकपर्णिका ॥ २६॥

एकपिङ्गपुराध्यक्षैकसूत्रध्वनिवादिनी ।
एकानंशैकलिङ्गस्थसाधकेष्टवरप्रदा ॥ २७॥

एकायनस्तुतैकैणतिलकाङ्कितशेखरा ।
ऐश्वर्यदैश्वर्यहरैश्वर्यगर्वापहारिणी ॥ २८॥

ओङ्काररूपिणी चोड्रपीठस्थांशुप्रभावती ।
कंसजिद्वल्लभा कंसघातिनी कंसतर्ज्जनी ॥ २९॥

कङ्कालमालिनी कङ्कशायमाता कृशोदरी ।
काकुत्स्थवन्दिता कञ्चुकालुमस्तकनर्तकी ॥ ३०॥

कनकप्रसवा कन्दसारवासा कपर्द्दिनी ।
कान्यकुब्जगता कामशत्रोर्वक्षःस्थलस्थिता ॥ ३१॥

कदम्बवनमध्यस्था कदम्बकुसुमप्रिया ।
कन्दराकरशीर्षस्था कपिशाञ्जनगेहिनी ॥ ३२॥

कपिवक्रस्तुता कम्बुग्रीवा कर्णपिशाचिनी ।
कर्णिकाचलशृङ्गस्था कादिविद्याप्रकाशिनी ॥ ३३॥

कलिन्दनन्दिनी काली कौलिनी कलिवर्द्धिनी ।
कर्मसंन्यासिकाराध्या कर्ब्बुरी कलिनाशिनी ॥ ३४॥

कर्व्वा कर्मविपाका च कञ्जोद्यानविहारिणी ।
कल्माषकण्ठभयदा कल्याणी कनकप्रभा ॥ ३५॥

कादम्बरी च कान्ताङ्घ्रिदोहदारण्यवासिनी ।
कान्तारभीतिसन्त्रस्तरक्षिणी कपिरूपिणी ॥ ३६॥

कापिशेयासनारूढा कापिशेयपतिप्रिया ।

कामकल्लोलसाम्राज्ञी कामेशी कापिशार्चिता ॥ ३७॥

कामजानरवा कामकेलिपाण्डित्यविग्रहा ।
कामरूपमहायोनिपीठस्था कामरूपिणी ॥ ३८॥

कामावसायिता कामलतालक्ष्या च कामिनी ।
कामरेखालयाधीशा कामाख्या कामरक्षिणी ॥ ३९॥

कार्त्तस्वराम्बरा कायस्था कायस्थप्रपूजिता ।
कार्त्तवीर्यान्तजननी कार्त्तवीर्यकुलाम्बिका ॥ ४०॥

कार्त्तान्तिका च कारुण्यसिन्धुसम्पूर्णमानसा ।
कार्त्तिकेयप्रसूः कालकण्ठगात्रनखक्षता ॥ ४१॥

कीनाशनाशकर्त्री च कीलालपविमर्दिनी ।
कुटुम्बपोषणासक्ता कुठाटङ्कधरप्रसूः ॥ ४२॥

कुणिन्दव्यापिनी कुण्ठा कुन्दिनी कुण्टकोदरा ।
कुण्डपाय्यफलाध्यक्षा कुन्तलीशीरपोषिणी ॥ ४३॥

कुमारी कुमुदावासा कुब्जिका च कुमोदिनी ।
कुरुकुल्ला कुम्भयोनिस्तुता कुलकुलायिका ॥ ४४॥

कुलस्त्री कुलनक्षत्रा कुलवारप्रपूजिता ।
कुलटा कुलधर्मिष्ठा कुलपर्वतवासिनी ॥ ४५॥

कुलेशशासना कौलेश्वरी च कुलिशासना ।
कृकवाकुध्वजक्षेत्रा कुलीना कुलशासना ॥ ४६॥

कुलका कुञ्जरारातिवाहना कलहप्रिया ।
कुबेराचलसाम्राज्ञी कुसृतिः कपटेश्वरी ॥ ४७॥

कुहूकण्ठरवप्रीता कूटस्था कुलिशाङ्कुशा ।
कूटार्थभाषिता कृत्तिवासोवक्षोविहारिणी ॥ ४८॥

कृशाङ्गी कूर्मचक्रस्था कृष्करार्द्धाङ्गहारिणी ।
कृपीटयोनिमध्यस्था कृतान्तजननी कृपा ॥ ४९॥

कृष्णपूज्या कृष्णजाया कृष्णाख्या कृष्णवल्लभा ।
कृष्णद्वैपायनज्ञानदायिनी कृष्णपिङ्गला ॥ ५०॥

कृष्णसारथिसम्पूज्या कृष्णसारङ्गरूपिणी ।
कृष्णाश्रिता कृष्णस्वसा केलिकोपवनाश्रया ॥ ५१॥

केश्यरिप्रेयसी कृष्णसखी केशिनिसूदना ।
कैटर्य्यवृक्षहिन्दोला कैटभी कैटभेश्वरी ॥ ५२॥

कैवर्त्ती कैरवी कोकबन्धुमाता किरातिनी ।
कोटरा कौशिकारातिवाहनप्रसवा तथा ॥ ५३॥

कौशीतकी कौशिकी च कौशिकर्षिवरप्रदा ।
क्रतुद्विड्दैत्यसंहन्त्री कौस्तुभस्वामिगेहिनी ॥ ५४॥

क्रौञ्चारातिप्रिया क्रौञ्चभगिनी क्रौञ्चदारणा ।
क्रोडास्या क्षितिजा क्षिप्ता क्षितिसन्तानचण्डिका ॥ ५५॥

क्षीरशुक्ला क्षीरसिन्धुसुता क्षेत्राधिदेवता ।
क्षेमङ्करी च क्षेत्रज्ञा क्षेत्रक्षेत्रज्ञबोधिनी ॥ ५६॥

खगेन्द्रकेतुरमणी खरारूढा खगासना ।
खराब्दाङ्कुरकाभा च खरा खट्वाङ्गधारिणी ॥ ५७॥

खड्गहस्ता खगास्या च खवास्पालयनन्दिनी ।
खसात्मजान्तका खष्पा खस्तनी खाण्डवान्तका ॥ ५८॥

खोङ्काहा खादुका खस्फाटिकास्या खोल्मुकप्रसूः ।
खेचरी खेचरीमुद्रा ख्यातिः खिङ्खिरविग्रहा ॥ ५९॥

गगनध्वजनेत्रा च गङ्गा गाङ्गेयपूजिता ।
गङ्गाधरसुता गङ्गाधरगार्हस्थ्यधर्मिणी ॥ ६०॥

गजसाह्वयसाम्राज्येश्वरनिर्वाणदायिनी ।
गजार्यासनसंरूढा गजास्या गजगामिनी ॥ ६१॥

गणदेवसमाराध्या गणनाथवरप्रदा ।
गणप्रसूर्गणाद्रीशा गणिका गणनायिका ॥ ६२॥

गणेशजननी गौरी गदाहस्ता गदान्तका ।
गतार्त्तवा गणद्रव्या गत्वरा गन्धकालिका ॥ ६३॥

गरुडाग्रजपद्मस्था गरुडध्वजमोहिनी ।
गर्भसंरक्षणकरी गर्भिणी गर्भघातिनी ॥ ६४॥

गायत्री गौतमी गीता गीर्देवी गुणसागरा ।
गुह्यकाली गुह्यविद्या गुह्ययोनिर्गुहप्रसूः ॥ ६५॥

गोकुलेशी च गौर्गोपी गोष्ठस्था गोपवल्लभा ।
गोलोकवासिनी गोला गोलाङ्गूलवरप्रदा ॥ ६६॥

गोविन्दप्रेयसी ग्राम्या ग्रहकल्लोलभीतिहा ।
घटोद्भवा घनश्यामा घुष्टा घण्टेश्वरप्रसूः ॥ ६७॥

घनवल्ली घनज्वाला घनपाखण्डखण्डिनी ।
चक्रपुष्करिणीक्षेत्रप्रेतमोक्षप्रदायिनी ॥ ६८॥

चक्राङ्की चक्रहस्ता च चक्रायुधनमस्कृता ।
चक्रेश्वरी च चक्रस्था चक्रराजनिवासिनी ॥ ६९॥

चक्षुष्मती चण्डिका च चञ्चला चण्डनायिका ।
चामुण्डा रक्तचामुण्डा चण्डमुण्डविनाशिनी ॥ ७०॥

चक्राधिवासिनी चण्डी चक्रिणी चक्रनायिका ।
चतुर्दन्तगजारूढा चतुर्वर्गफलप्रदा ॥ ७१॥

चतुर्विद्या चतुर्वेदा चतुरा च चतुर्गतिः ।
चन्दनाचलविश्रामा चन्द्रद्वीपाधिदेवता ॥ ७२॥

चन्द्रकूटाद्रिसंस्थाना चन्द्रिका चन्द्रशेखरा ।
चन्द्रहासा चन्द्रकला चन्द्रशेखरवल्लभा ॥ ७३॥

चरणव्यूहविज्ञानबोधिता चरमाचला ।
चर्च्चिका चर्ममुण्डा च चातुर्मास्यमहोत्सवा ॥ ७४॥

चातुराश्रम्यमर्यादा चामीकरसमुज्ज्वला ।
चार्वाकार्हन्तविध्वंसा चित्रा चित्तसमुन्नतिः ॥ ७५॥

चिन्तामणिश्चित्रलेखा चित्रमेखलवाहना ।
चित्रकूटनिवासा च चित्रगुप्तवरप्रदा ॥ ७६॥

छायामृगधरज्योत्स्ना छाया छागबलिप्रिया ।
जगद्गौरी जगद्धात्री जटाला जगदम्बिका ॥ ७७॥

जगद्वहा जगद्योनिर्जठरस्था जनाश्रया ।

जनमेजयसम्पूज्या जननी जनकात्मजा ॥ ७८॥

जम्भला जह्नुतनया जपयज्ञपरायणा ।
जमदग्निप्रिया जम्भद्विडाराध्या जयप्रदा ॥ ७९॥

जरत्कारुर्जरत्कारुप्रिया जातिर्ज्वरापहा ।
झषोदरी झषाङ्कारिप्रिया टङ्कारनादिनी ॥ ८०॥

डाकिनी डाकिनीपूज्या तत्त्वज्ञानविधायिनी ।
तन्तुनागसमारूढा तत्त्वन्यासफलप्रदा ॥ ८१॥

तन्त्रोपदेशिका तन्त्रमार्गपूज्या तपस्विनी ।
तन्द्रा तपस्या तन्मात्रा तान्त्रिकी तपनात्मजा ॥ ८२॥

ताण्डवप्रेयसी तर्कविद्या तापतमस्विनी ।
तामसी तारिणी तारा त्रिपुरा त्रिपुरान्तका ॥ ८३॥

तिलपुष्पसमघ्राणा तृप्तिस्त्रिपुरभैरवी ।
तिलोत्तमा तीक्ष्णदंष्ट्रा तीव्रा तालाङ्कवल्लभा ॥ ८४॥

तेजस्विनी त्रपारण्डा त्रिकालज्ञा त्रिलोचना ।
त्रैलोक्यैश्वर्यवरदा त्रिगुणा त्रिदशोद्भवा ॥ ८५॥

त्रिसन्ध्यव्यापिनी तिस्रपीठाचार्यप्रकाशिनी ।
त्रिहायणी च त्रैलोक्यविजया त्र्यम्बकानुगा ॥ ८६॥

त्विषाम्पतिप्रसूर्दक्षकन्या दक्षविनाशिनी ।
दाक्षायणी दक्षिणाशेश्वरी दक्षिणकालिका ॥ ८७॥

दक्षिणाचारसन्तुष्टा दक्षिणा दग्धविग्रहा ।
दण्डनाथा दण्डनीतिर्दण्डनारायणप्रिया ॥ ८८॥

दधीच्यस्थिस्थिता दध्यानी दैत्यद्विड्वरप्रदा ।
दमयन्ती च दम्भोलिहस्ता दम्भनिवारणा ॥ ८९॥

दरिद्रा दर्दुरा दर्दरीकघोषा दशारुहा ।
देवेशदशनोच्छिष्टा दशग्रीवनिपातिनी ॥ ९०॥

दशावतारजननी दिग्वस्त्रा चैव दस्रसूः ।
दाशार्हरमणी दाशनन्दिनी दहनप्रिया ॥ ९१॥

देवमाता दितिर्देवी देवलोकनिवासिनी ।
दिवस्पतिप्रिया दिव्या दिव्यवस्त्रा दिगम्बरा ॥ ९२॥

दुग्धाब्धिजा दिव्यगन्धा च दिष्टान्तविधायिका ।
दीप्तपिङ्गलसंस्थाना दीप्ता दिव्योपपादुका ॥ ९३॥

दुरिष्टदमनी दुर्गा दुर्गार्तित्राणकारणा ।
दुर्जया दुर्जनद्वेषा दुर्वासोवरदायिनी ॥ ९४॥

दूषणारिप्रिया दृष्टिविक्षेपास्त्रप्रकाशिनी ।
दुर्लभा दुर्विनीता च दुर्योधनक्षयङ्करी ॥ ९५॥

देवपत्नी देवसेना देवता देवकात्मजा ।
दैववाणी च दैवज्ञा देशिका दैवकोविदा ॥ ९६॥

दोषज्ञा दुष्टसंहारिणी दोर्दण्डपराक्रमा ।
द्वात्रिंशन्नामसम्पूज्या द्रौपदी द्रविडेश्वरी ॥ ९७॥

द्वारिकाधीशतनया द्वारिकाधीशगेहिनी ।
द्वारिकाकुलविध्वंसकारिणी द्वारवासिनी ॥ ९८॥

दिव्यकार्त्तस्वरागेन्द्रधनुष्कोटिप्रकाशिनी ।
द्विजराजप्रिया क्षेत्रपालद्वाःस्थितदर्शका ॥ ९९॥

द्विजेन्द्रवरदा द्वैमातुरक्षेत्रा धरासुता ।
धरित्री धेनुकाधर्मचारिणी धर्मचारिणी ॥ १००॥

धर्मचिन्ता धनुर्विद्या धर्मराजजयप्रदा ।
धूमावती च धिषणा धूम्रलोचनघातिनी ॥ १०१॥

ध्वान्तसम्मर्दिनी धौतकौशेयी ध्वाङ्क्षवाहना ।
नक्तञ्चरचमूभक्षा नकुलीशप्रपूजिता ॥ १०२॥

नक्षत्रमालिनी नक्रघातिनी नखरायुधा ।
नागाम्बा नागभगिनी नगजा नगनन्दिनी ॥ १०३॥

नटेश्वरप्रिया नाट्यविद्या नन्दा नटेश्वरी ।
नन्दिकेश्वरपृष्ठस्था नन्दजा नन्दनन्दिनी ॥ १०४॥

नभोमण्डलदीपास्या नभोद्वीपसमस्वरा ।
नरकेष्टा नरकान्तकरी नरकदेवता ॥ १०५॥

नरनारायणाराध्या नरविष्वणनाशिनी ।
नरमेधप्रिया नाकनायिका नहुषप्रिया ॥ १०६॥

नवोद्भूतसुगन्धा च नवरात्रसमर्चिता ।
नानानुष्ठानसद्रूपा नागारातीशवल्लभा ॥ १०७॥

नारायणी निराकारा निकषात्मजवैरिणी ।
निकुम्भिला निग्रहेशी निग्रहेश्वरकामिनी ॥ १०८॥

निग्रहागमसन्तुष्टा निग्रहागमपूजिता ।
निःशेषनिग्रहाध्यक्षा निग्रहाज्ञाप्रवर्त्तिनी ॥ १०९॥

निग्रहाचार्यवरदा निग्रहाचार्यरक्षिणी ।
निग्रहानुग्रहकरी निग्रही निग्रहेश्वरी ॥ ११०॥

निग्रहाचारनिपुणा दुष्टनिग्रहकारिका ।
निरालम्बा निरम्बा च निर्गुणा निरवग्रहा ॥ १११॥

निर्विकल्पसमाधिस्था निर्विण्णा निवराकृतिः ।
निवातकवचत्रासकारिणी च निषद्वरी ॥ ११२॥

निलिम्पनिर्झरी नीतिर्नीतिशास्त्रविशारदा ।
निशुम्भशुम्भहननी नीलगीर्नीलकुन्तला ॥ ११३॥

नीलाचलनिवासा च नीलमाधवगेहिनी ।
नीलाब्जवदना नीललोहितेश्वरवल्लभा ॥ ११४॥

नृसिंहरूपिणी न्यक्षघातिनी निगमस्तुता ।
पञ्चप्रेतासनारूढा पञ्चकृत्यविधायिनी ॥ ११५॥

पञ्चाननसमारूढा पञ्चाननरतिप्रिया ।
पञ्चाम्नायमहाविद्या पञ्चमाननकृन्तनी ॥ ११६॥

प्रजापतिप्रिया पञ्चाङ्गुलिः पञ्चार्थदायिनी ।
पञ्चाथर्वशिरोमन्त्रसिद्धिदा प्रियवादिनी ॥ ११७॥

पञ्चकोषस्थिता पञ्चायतनस्था च पञ्चधा ।
पञ्चरात्रस्तुता पञ्चक्लेशहन्त्री च पण्डिता ॥ ११८॥

प्रकृतिश्च प्लवङ्गेन्द्रमहासैन्यप्रपूजिता ।

फेत्कारिणी फलाध्यक्षा फलदा फाल्गुनप्रिया ॥ ११९॥

बकजिद्रक्षिणी बल्या बकघ्नी बडवामुखी ।
बलभद्रप्रिया बाला बगला बलवर्द्धिनी ॥ १२०॥

बलिन्दमशिरच्छेत्री बलारातिजयप्रदा ।
बाणगङ्गा बाणमाता बाणासुरनिपातिनी ॥ १२१॥

बाभ्रवी बालसन्ध्या च बलिदानप्रिया बला ।
बालार्कमण्डलाभासा बिल्ववृक्षनिवासिनी ॥ १२२॥

ब्रह्मकर्मसमाधिस्था बौद्धपाखण्डखण्डिनी ।
ब्रह्मज्ञा ब्रह्मरमणी ब्रह्माणी ब्रह्मचारिणी ॥ १२३॥

ब्रह्मज्ञानप्रदात्री च ब्रह्मदण्डप्रहारिणी ।
ब्रह्मनिर्वाणरूपा च ब्रह्मराक्षसभीतिहा ॥ १२४॥

ब्रह्मर्षिपूजिता ब्रह्मविद्या ब्रह्मस्वरूपिणी ।
ब्रह्मवेदस्तुता ब्रह्मसूत्रा ब्रह्मवरप्रदा ॥ १२५॥

ब्रह्मास्त्रविद्या ब्रह्मास्त्रस्तम्भिनी ब्रह्मघातिनी ।
भक्तिर्भगवती भक्तवाञ्छासङ्कल्पपादपा ॥ १२६॥

भगीरथसुता भक्तपालिनी भगमालिनी ।
भण्डासुरनिहन्त्री च भद्रकाली भयप्रदा ॥ १२७॥

भद्रा भद्रहरा भद्रप्रदा भद्रेश्वरप्रिया ।
भद्रात्मजधरा भद्राश्रयसञ्चर्चितस्तनी ॥ १२८॥

भरद्वाजस्तुता भव्या भारती भरतप्रसूः ।
भर्गोयुक्ता भगाकारा भरतप्राणरक्षिणी ॥ १२९॥

भवप्रिया भवानी च भवदा भवनाशिनी ।
भस्मासुरविनाशा च भस्माचलनिवासिनी ॥ १३०॥

भार्गवी भार्गवाराध्या भाष्यकारवरप्रदा ।
भास्करेष्टा भागवतश्लोकचारित्रवर्द्धिनी ॥ १३१॥

भूतात्मिका भूतहन्त्री भीमा भीमपराक्रमा ।
भूतभूमिविहारा च भूतनी भूतनायिका ॥ १३२॥

भृङ्गीशार्द्धशरीरस्था भूपुत्री भिल्लसुन्दरी ।
भेरुण्डा भैरवी भोगावली भैरववल्लभा ॥ १३३॥

मकरस्था मगाराध्या मकरध्वजवर्द्धिनी ।
मङ्गलाङ्गी महामाया माधवी मगधेश्वरी ॥ १३४॥

मत्स्योदरी मत्स्यगन्धा मणिद्वीपाधिदेवता ।
मत्तेभगमना मत्ता मातङ्गी मणिकर्णिका ॥ १३५॥

मदना मदनावस्था मदनायुधरूपिणी ।
मदिराक्षी च मनसा मीनाक्षी मदनोत्सवा ॥ १३६॥

मायाविनी मनोगुप्ता मन्त्रजिह्वा मनस्विनी ।
मन्दाकिनी महाकाली मर्यादा च महोदरी ॥ १३७॥

महालक्ष्मीर्महाकालप्रिया मार्त्तण्डभैरवी ।
महिषघ्नी महापापहरा महिषमर्दिनी ॥ १३८॥

मायासीता महाकौलज्ञानदात्री महाशया ।
माहेश्वरी च माकातारूपिणी मानसालया ॥ १३९॥

मूर्द्धाभिषिक्तहर्म्यस्था मुरलीधरमोहिनी ।
मूलाधारस्थिता मूलप्रकृतिर्मेनकात्मजा ॥ १४०॥

महारुद्रप्रिया मेना मैनाकाद्रिसहोदरा ।
माङ्गल्यदा महारात्रिर्मोहरात्रिश्च मोहिनी ॥ १४१॥

यक्षिणी यक्षरात्रिश्च यज्ञनारायणप्रसूः ।
यज्ञनारायणाराध्या यज्ञनारायणप्रिया ॥ १४२॥

यज्ञोपवीतिनी यज्ञपशुस्वर्गसुखप्रदा ।
यथाशास्त्रसदाचारा यथार्थफलदायिनी ॥ १४३॥

यादवेन्द्रकुलाराध्या यादवेन्द्रवरप्रदा ।
यमी यामवती यामी यमपत्नी यशस्विनी ॥ १४४॥

युवती युद्धदक्षा च युधिष्ठिरप्रपूजिता ।
योनिमुद्रा योगमाया योगनिद्रा च योगिनी ॥ १४५॥

योगीश्वरी च योगस्था योगेश्वरनमस्कृता ।
योगेश्वरी च रक्ताक्षी रक्तबीजाशनी रमा ॥ १४६॥

रक्तवस्त्रा रक्तजिह्वा रक्ताङ्गी रक्तदन्तिका ।
रक्षोघ्नी रक्षिका रक्षोजननी रङ्गनायिका ॥ १४७॥

रजताद्रिनिवासा च रजनीचरवल्लभा ।
रजनीकरदारा च रजनीचरनाशिनी ॥ १४८॥

रणालङ्करणप्रेमा रणस्थानविहारिणी ।
रतार्थिनी रती रण्डा रतिमन्दिरसुन्दरी ॥ १४९॥

रत्नपारायणध्वंसकरी रत्नाकरप्रिया ।
रत्नपारायणावासा रत्नाभरणभूषिता ॥ १५०॥

रथक्रान्तागमाराध्या रथाङ्गायुधयोधिनी ।
रथाङ्गपाणिरमणी रमणी रमणप्रिया ॥ १५१॥

रसातलनिवासा च रसज्ञा रविलोचना ।
रसवारिधिमध्यस्था रासेशी रसिकेश्वरी ॥ १५२॥

रसेश्वरी रसास्वादा राक्षसेन्द्रवरप्रदा ।
राधिका राजलक्ष्मीश्च राक्षसेन्द्रविनाशिनी ॥ १५३॥

रामस्तुता राममाता रामचन्द्रजयप्रदा ।
रामाङ्घ्रिपाविता रामभगिनी रामवल्लभा ॥ १५४॥

रामारातिविनाशा च रामदूतवरप्रदा ।
रामायणकथावक्त्री राघवानन्यरूपिणी ॥ १५५॥

रासभस्था रिपुद्रोहा रासमण्डलनायिका ।
रुक्मिणी रुक्मवर्णा च रुक्मिणीसुतवल्लभा ॥ १५६॥

रुद्राक्षमालिनी रुद्रगेहिनी रोगहारिणी ।
रुद्राणी रुद्रचण्डी च रेणुका रिपुभक्षिणी ॥ १५७॥

लक्ष्मीर्लज्जा लोकमाता लोपामुद्रा च लङ्किनी ।
लाक्षारुणा लोककान्ता ललिता ललितप्रिया ॥ १५८॥

लक्ष्मणप्रेयसी लक्ष्यभेदिनी लवणान्तका ।
लतासाधनसम्पूज्या लोहितस्त्रवमण्डिता ॥ १५९॥

लोकघ्नी लोकजननी वामाचारपरायणा ।

वाराही वङ्गदेशस्था वज्रिणी वज्रकालिका ॥ १६० ॥

वज्रज्वाला तथा वज्रवाराही वज्रशृङ्खला ।
वटपत्राश्रितप्राणविष्णुश्लोकार्द्धदायिनी ॥ १६१ ॥

वनदुर्गा वराङ्गी च वरदा वनमालिनी ।
वर्णाश्रमविधानज्ञा वर्षिष्ठा वर्णमातृका ॥ १६२ ॥

वह्निप्रिया च वाग्देवी व्यासचिन्तापहारिणी ।
शङ्खिनी शक्रमाता च शम्बरासुरसूदनी ॥ १६३ ॥

शम्भुप्रिया च शम्बूकघातिनी शशिशेखरा ।
शिवदूती शिवा शङ्का शाकिनी शिखिवाहना ॥ १६४ ॥

शास्त्रसंरक्षिणी सप्तशतीपूज्या सभोचिता ।
सती सत्यवती सत्या सम्प्रदायप्रदायिनी ॥ १६५ ॥

कालरात्रिर्महामारी महाविद्या हरप्रिया ।
मित्रनाथसुहृत्प्रेमा सिद्धनाथवरप्रदा ॥ १६६ ॥

चतुष्पीठाधिगा शक्तिः सिद्धाज्ञापारमेश्वरी ।
सर्वसिद्धान्तनिष्पन्नमनन्तगुणभूषितम् ॥ १६७ ॥

निग्रहागमसंसिद्धं निग्रहाधीश्वरीप्रियम् ।
निग्रहाचार्यसम्प्रोक्तं नामसाहस्रकं महत् ॥ १६८ ॥

कामरूपे शतावर्तं कृत्वा सिद्धो भवेन्नरः ।
यः पठेत्प्रयतो भक्त्या स देव्याः पदवीमियात् ॥ १६९ ॥

॥ इति श्रीनिग्रहागमसम्मतं श्रीनिग्रहाचार्यपदस्थेन
श्रीभागवतानन्दगुरुणा प्रोक्तं श्रीनिग्रहेश्वरीसहस्रनामस्तोत्रम् ॥

Composed by Shri Bhagavatananda Guru

*Shri Nigraheshvari Sahasranama Stotram*

pdf was typeset on September 5, 2024

Please send corrections to *sanskrit@cheerful.com*